**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**प्रवेशपरीक्षा – प्रथमपत्रिका**

**दिनाङ्क:- २५. ८.२०१९** **पूर्वाह्ण: १०.००त: १.०० पर्यन्तम्**

**समय:- होरात्रयम्** **अङ्का: - १००**

**सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयु:**

1. **अष्टानाम् एकवाक्येन उत्तरं लिखत।** **8**

१. टीटिभ: कस्य शिष्य: आसीत् ?

२. अम्बा कदा ननर्त ?

३. राज्यवर्धनस्य पिता क: ?

४. बहुच्छला: श्रिय: कै: असुरक्षा: ?

५. उर्वश्या: प्रियसखी का ?

६. मित्रावसो: पिता क: ?

७. देहसारूप्यं कयो: भवति ?

८. कादम्बरीसंग्रह: कै: निबद्ध: ?

९. मन्त्रोपनिषदं कृशाश्व: कस्मै प्रोवाच ?

१०. बाणभट्टस्य आत्मज: क: ?

2. **षण्णां वाक्यद्वयेन उत्तरं लिखत।** **12**

१. मालिकामणिहार: कुत्र आसीत् ? क: तं जगृहे ?

२. भक्तिसुधातरङ्गिणीग्रन्थे कै: रचितानि स्तोत्राणि सन्ति ? तानि कान्यधिकृत्य रचितानि ?

३. कयो: मध्ये चतुर्विंशति दिनानि युद्धम् अभवत् ? युद्धे क: जित: ?

४. पुष्पभूते: सहायका: के ? तान् राजा कुत्र स्थापयामास ?

५. का प्रमादयुता बभूव ? प्रमादपरिणाम: क: ?

६. चन्द्रकेतु: क: ? स: केन जित: ?

७. किङ्कर: शङ्खचूडाय किम् अदात् ? किमुवाच च ?

८. आस्थाननलिनीधूर्तबकै: किम् उपदिश्यते ?



Scanned by CamScanner

3. **त्रयाणां पञ्चषैः वाक्यैः संस्कृते उत्तरं लिखत।** 9

१. काशीराजपुत्री चन्द्रं पूजयित्वा राजानं किमाचष्टे ?

२. शिशुकलहमाकर्ण्य के के समागताः ? ते कथम् आसन् ? कथं च समागताः ?

३. 'दीयतां वध्यचिह्नम्' इति नायके वदति, शङ्खचूडः तं किमब्रवीत् ?

४. मतिमान् किं समुपेक्षेत ? कुतः ?

५. युद्धात् निवारयन्तीं मातरं गाङ्गेयः किमुवाच ?

4. **त्रयाणां ससन्दर्भं विवृणुत।** 9

१. " अनुजग्राह कुलं कुटुम्बिनाम् "

२. " भुजे वीर्यं निवसति, न वाचि "

३. " न तितिक्षासममस्तिसाधनम् "

४. " नैवायमुपरोधः, किन्तु अनुग्रहोऽयं महान् "

५. " कुशलं तव दिव्यास्त्रधरदेहस्य किमु "

5. **एकस्य पद्यस्य सान्वयमर्थं लिखत।** 4

१. अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः।
सुकरस्तरुवत् सहिष्णुना रिपुरुन्मूलयितुं महानपि॥

२. वासोयुगमिदं रक्तं प्राप्ते काले समागतम्।
करोति महतीं प्रीतिं परार्थं देहमुज्झतः॥

6. **श्लोकद्वयं पूरयत।** 6

१. विद्यामुद्राक्षमाला --------------------- मह्यम्॥

२. शान्त्याद्याः सम्पदो मे ---------------- मह्यम॥

३. सहसा विदधीत --------------------- सम्पदः ॥

7. **एकस्य कवेः देश-काल-कृति-वैशिष्ट्य-विषये लिखत।** 4

१. नीलकण्ठदीक्षितः २. भवभूतिः



Scanned by CamScanner

**8. चतुर्णां रूपाणि परिचाययत।** **4**

१. आत्मेच्छया २. पुरोधसः ३. उपशशाम
४. निषेधन्तः ५. जय्यम् ६. स्थेमा

**9. चत्वारि पदानि संस्कृतवाक्येषु योजयत।** **4**

१. असूयन्ति २. वात्या ३. अधितिष्ठति
४. जानीषे ५. विशेषतः ६. कमिता

**10. चतुर्णां पर्यायपदं लिखत।** **4**

१. कुसुमशरः २. शरासनम् ३. रयः
४. अभ्रम् ५. आपगापतिः ६. वैनतेयः

**11. चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत।** **6**

१. इत्याज्ञाप्य २. नैकानि ३. सर्वैरपि
४. निस्सरति ५. तरङ्गिणीव ६. अकरोदाढ्यान्

**12. चतुर्णाम् एकपदं लिखत।** **4**

१. राज्ञां समूहः २. गुरूपदेशं विना ज्ञातानि ३. ककुस्थवंशे जातः
४. चौर्येण अवाप्तं धनं ५. दशानां रात्रीणां समाहारः ६. तरुणतृणविशिष्टदेशः

**13. चतुर्णां व्याकरणविशेषं लिखत।** **8**

१. कुप्यन्ति हितवादिने २. मलिनीभवति ३. शेषमयम्
४. दार्षदः ५ नमः सभायै ६. गृहम् अधिवसति

**14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत।** **8**

१. वृत्तिसारूप्यम् २. भीष्मजामदग्न्ययोः ३. मुखचन्द्रम्
४. पञ्चषाः ५. चतुरश्रबुद्धिः ६. यथामति



Scanned by CamScanner

**15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत।** **6**

१. आचचक्षे
२. ददाति
३. वर्तेरन्
४. कुरु
५. बभूवुः
६. अन्वभवत्

**16 चतुर्णां रिक्तस्थानानि पूरयत।** **4**

१. प्रभाकरवर्धनपत्नी रोहिणीव ------ आसीत्।

२. श्रीशङ्करजयन्तीमहोत्सवः ------- तिथौ समाचरणीयः।

३. नृपतेः करे उपदीकृतं ------- आसीत्।

४. जायन्ते च -------- च मादृशाः क्षुद्रजन्तवः।

५. शङ्खचूडः--------- कुलं न मलिनी करिष्यति।

-------------------



Scanned by CamScanner

**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**प्रवेशपरीक्षा - द्वितीयपत्रिका**

**दिनाङ्कः - २५. ८.२०१९** **अपराह्णः १.३०तः ३.००पर्यन्तम्**

**समयः - सार्धैकहोराः** **अङ्काः ५०**

**<u>सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयुः</u>**

**1. विषयद्वयं सोदाहरणं विवृणुत।** **10**

१. सन्नन्तधातुरूपाणि

२. प्रयोगाः

३. कृदन्ताव्ययानि

**2. विषयद्वयं विवृणुत।** **8**

१. कर्मधारयसमासः - सोदाहरणं विवृणुत।

२. व्यतिरेकालङ्कारः - सोदाहरणं विवृणुत।

३. कृत्वा पुंवत्पातमुच्चैर्भृगुभ्यो - अत्र विद्यमानं छन्दः सप्रस्तारं सलक्षणं विवृणुत।

**3. त्रयाणां सर्वाणि रूपाणि तत्तल्लकारे लिखत।** **9**

| | | |
|---|---|---|
| १. ब्रवीति | २. असूत | ३. अस्तु |
| ४. कुरुते | ५. बिभेति | ६. अधीयीत |

**4. चतुर्णाम् अन्यलिङ्गरूपाणि लिखत।** **4**

| | | |
|---|---|---|
| १. उक्तवती | २. गच्छन् | ३. कारकः |
| ४. नयमानं | ५. गायत् | ६. स्मृतवत् |

**5. द्वयो : प्रयोगं व्यत्यस्यत।** **3**

| | |
|---|---|
| १. गुरुभिः अत्रैव स्थीयते। | ३. भक्तैः भगवान् वरान् याच्यते। |
| २. शिष्याः पाठशालां यान्ति। | ४ . बालः फलानि खादति। |



Scanned by CamScanner

**6. त्रयाणां विग्रहवाक्यं कृत्वा समासनाम लिखत।** **6**

| | | |
|---|---|---|
| १. सप्तर्षय: | २. विद्याधनम् | ३. अपापम् |
| ४. स्वर्गपतित: | ५. देवब्राह्मण: | ६. नीलोत्पलम् |

**7. मातृभाषया अनुवदत ।** **5**

१. तव शिष्यं मां शाधि इति अर्जुन: कृष्णमुवाच।

२. भगवान् वामन: त्रीनपि लोकान् अमिमीत।

३. रामायणं ये शृण्वन्ति ते भगवति रामे भक्तिं प्राप्नुवन्ति।

४. हे सेवका:! सभामन्दिरे शीघ्रं दीपा: इन्धताम्।

५. इमां प्रसूनमालां का अग्रथ्नात् इति किं यूयं जानीथ ?

**8. संस्कृतभाषायाम् अनुवदत |** **5**

1. Warriors went to the battlefield with courage.
   ಯೋಧರು ಶೌರ್ಯದಿಂದ ಯುದ್ಧಭೂಮಿಗೆ ಹೊರಟರು.
2. Janaka gave his daughter to Rama.
   ಜನಕನು ತನ್ನ ಮಗಳನ್ನು ರಾಮನಿಗೆ ಕೊಟ್ಟನು.
3. Good people earn merits by serving others.
   ಒಳ್ಳೆಯ ಜನರು ಪರೋಪಕಾರದಿಂದ ಪುಣ್ಯವನ್ನು ಗಳಿಸುತ್ತಾರೆ.
4. People of Kerala apply oil on the body daily.
   ಕೇರಳದ ಜನರು ಪ್ರತಿದಿನ ದೇಹಕ್ಕೆ ಎಣ್ಣೆಯನ್ನು ಬಳಿದುಕೊಳ್ಳುತ್ತಾರೆ.
5. Just by their sight the Sadhus purify the sinners,
   ಸಾಧುಗಳು ತಮ್ಮ ದರ್ಶನ ಮಾತ್ರದಿಂದಲೇ ಪಾಪಿಗಳನ್ನು ಪವಿತ್ರಗೊಳಿಸುತ್ತಾರೆ.

--------



Scanned by CamScanner